श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नासदीयसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नासदीयसूक्तम् ॥

नास॑दासी॒न्नो सदा॑सीत्त॒दानी॑म्।
नासी॒द्रजो॒ नो व्यो॑मा प॒रो यत्।
किमाव॑रीव॒ः कुह॒कस्य॒ शर्म॑न्।
अम्भ॒ः किमा॑सी॒द्गह॑नं गभी॒रम्।
न मृ॒त्युर॒मृतं॒ तर्हि॒ न।
रात्रि॑या॒ अह्न॑ आसीत्प्रके॒तः।
आनी॑दवा॒तग्ग् स्व॒धया॒ तदेकं॑म्।
तस्मा॑द्धा॒न्यं न प॒रः किञ्च॒नास॑।
तम॑ आसी॒त्तम॑सा गू॒ढमग्रे॑ प्रके॒तम्।
स॒लि॒लग्ं सर्व॑मा इ॒दम्॥ **1** ॥

तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॑त्।
तम॑स॒स्तन्म॑हि॒ना जा॑य॒तैकं॑म्।
काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑।
मन॑सो॒ रेत॑ः प्रथ॒मं यदासी॑त्।
स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्।
हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा।

ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम्।
अ॒धस्स्वि॑दा॒सी(३)दु॒परि॑स्विदासी(३)त्।
रे॒तो॒धा आ॑सन्महि॒मान॑ आसन्।
स्व॒धा अ॒वस्ता॒त्प्रय॑तिः प॒रस्ता᳚त्॥ **2**॥

को अ॒द्धा वे॑द॒ क इ॒ह प्रवो॑चत्।
कुत॒ आजा॑ता॒ कुत॑ इ॒यं विसृ॑ष्टिः।
अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय।
अथा॒ को वे॑द॒ यत॑ आब॒भूव॑।
इ॒यं विसृ॑ष्टि॒र्यत॑ आब॒भूव॑॥ **3**॥

यदि॑ वा द॒धे यदि॑ वा॒ न।
यो अ॒स्याध्य॑क्षः पर॒मे व्यो॑मन्।
सो अ॒ङ्ग वे॑द॒ यदि॑ वा॒ न वेद॑।
किग्ग्स्वि॒द्वनं॒ क उ॒स वृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः॥ **4**॥

मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ तत्।
यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑।
ब्रह्म॒ वनं॒ ब्रह्म॒ सवृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः।
मनी॑षिणो॒ मन॑सा॒ विब्र॑वीमि वः।
ब्रह्मा॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑॥ **5**॥

ओं शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

**॥ इति नासदीयसूक्तं समाप्तम् ॥**